मरः। ३। १। ८८॥ अस्य पर्य्यायान्तरं निश्चितशब्दे द्रष्टव्यम्॥

न्यस्तशस्त्रः, पुं, (न्यस्तं शस्त्रं येन। युद्धादिविरतत्वात् तथात्वम्।) पितृलोकः। इति त्रिकाण्डशेषः॥ (यथा, मनुः। ३। १९२।
"अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः। न्यस्तशस्त्रा महाभागाः पितरः पूर्व्वदेवताः॥")
त्यक्तशस्त्रे, त्रि। यथा,—
"न्यस्तशस्त्रं दिलीपस्य तस्य शुश्रुवुषां प्रभुम्।
रामासहृतनाराचे हृदि शल्यमिवार्पितम्॥"
इति रघुः॥

न्याच्यं, क्ली, (नितरामच्यते इति। नि+अच+ण्यत्।) भ्रष्टतण्डुलम्। सड़ी इति भाषा॥ तत्पर्य्यायः। भ्रष्टान्नम् २ कुक्कुटम् ३। इति शब्दचन्द्रिका॥

न्यादः, पुं, (न्यदनमिति। नि+अद भक्षणे+ "नौ ण च।" ३। ३। ६०। इति णः।) आहारः। इत्यमरः। २। ९। ५६॥

न्यायः, पुं, विष्णुः। यथा,
"वाग्मीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः।"
इति तस्य सहस्रनाममध्ये गणितः॥ *॥
(नियमेन ईयते इति। नि+इण्+"परिन्योर्नीणोर्द्यूताभ्रेषयोः।" ३। ३। ३७। इति घञ्।) उचितः। तत्पर्य्यायः। अभ्रेषः २ कल्पः ३ देशरूपम् ४ समञ्जसम् ५। इत्यमरः। ३।२।२४॥ *॥ (नीयन्ते प्राप्यन्ते विवक्षितार्था येनेति। नी+"अध्यायन्यायोद्यावसंहाराश्च।" ३। ३। १२२। इति घञ्प्रत्ययेन निपातनात् साधुः। नीतिः। जयोपायः। भोगः। युक्तिः। इति चिन्तामणिः॥) प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकपञ्चावयववाक्यम्। तल्लक्षणं यथा। अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वम्। इति चिन्तामणिः॥ उचितानुपूर्व्विकप्रतिज्ञादिपञ्चकसमुदायत्वम्। इति शिरोमणिः॥ तल्लक्ष्यं यथा। पर्व्वतो वह्निमान् धूमात् यो यो धूमवान् स वह्निमान् यथा महानसं वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमान्। इति जगदीशः॥ *॥
(पञ्चाङ्गमधिकरणम्। यथा, महाभारते। २। ५। ३।
"न्यायविद्धर्म्मतत्त्वज्ञः षड़ङ्गविदनुत्तमः।"
"न्यायः पञ्चाङ्गमधिकरणम्। यथा,—
'विषयो विषयश्चैव पूर्व्वपक्षस्तथोत्तरः।
पक्षद्वयफलञ्चैव शास्त्रेऽधिकरणं विदुः॥'
अत्र, यूपस्य स्वरु करोति इति वाक्यं विषयः। तत्र षष्ठी यूपसम्बन्धिकर्त्तव्यता लक्षणार्था उत यूपावयवलक्षणार्था इति सन्देहो विषयः। एतावेव पूर्व्वोत्तरपक्षौ ज्ञेयौ। कल्पना लाघवानुग्रहादुत्तरः पक्षः सिद्धान्तः। फलं अनुष्ठानभेदः। पूर्व्वपक्षे तक्षणाष्टास्री करणादिना काष्ठान्तरं यूपसदृशं निर्म्मातव्यम्। सिद्धान्ते एकदेशस्य पृथक् करणमात्रमिति। इदमेव पञ्चकं मोक्षधर्म्मेषूक्तम्।
'सूक्ष्मं सांख्यक्रमौ चोभौ निर्णयः सप्रयोजनः।
पञ्चैतान्यनुजानीहि वाक्यमित्युच्यते बुधैः॥"
सूक्ष्मं गहनार्थत्वाद्विषयः। सांख्यः एवमेवं वेति विचारः। क्रमः अतिक्रमः सिद्धान्तस्य पूर्व्वः पक्ष इत्यर्थः। निर्णयः सिद्धान्तः। प्रयोजनं फलम्। इति वाक्यं वाक्यार्थनिर्णयोपायः एवं पूर्व्वोत्तरमीमांसाधिकरणानि न्यायस्त्विति॥"
इति तट्टीकायां नीलकण्ठः॥ *॥)
षड़्दर्शनान्तर्गतदर्शनविशेषः। तत्पर्य्यायः। तर्कविद्या २ आन्वीक्षिकी ३। इत्यमरभरतौ॥ एतद्दर्शनमते नित्येच्छाकृतिमतिसहितः परमात्मा ईश्वरः स तु ब्रह्मपदार्थो जीवातिरिक्तः। एतच्छास्त्रप्रयोजनं चार्व्वाकादिमतनिराकरणपूर्व्वकं जगत्कारणतया ईश्वरसंस्थापनं संशयादिनिरूपणेन वेदार्थनिर्णयश्च। न्यायदर्शनकारो गोतमः। तत्सूत्रे प्रमाणादिषोड़शपदार्थनिरूपणम्। तेषां तत्त्वज्ञानान्निःश्रेयसम्। तस्य भाष्यकारो वात्स्यायनः। तद्वार्त्तिककारः कात्यायनः। तट्टीकाकारो वाचस्पतिमिश्रः। तच्छात्र उदयनाचार्य्यः कुसुमाञ्जलिप्रभृतिग्रन्थकारः। कुसुमाञ्जलिटीकाकारौ हरिदासरामभद्रौ। गङ्गेशोपाध्यायः प्रत्यक्षानुमानोपमानशब्दाख्यखण्डचतुष्टयात्मकचिन्तामणिकारः। तत्सुतो वर्द्धमानोपाध्यायस्तयोश्छात्रौ मणिमिश्रयज्ञपत्युपाध्यायौ मणिप्रभाकरौ। यज्ञपत्युपाध्यायच्छात्रः पक्षधरमिश्रश्चिन्तामण्यालोककारः। पक्षधरमिश्रच्छात्रो रघुनाथशिरोमणिश्चिन्तामणेर्दीधितिकारः। तच्छात्रो मथुरानाथतर्कवागीशश्चिन्तामणिदीधित्योष्टीकाकारः। तच्छात्रो भवानन्दसिद्धान्तवागीशो दीधितिटीकाकारः। तच्छात्रौ जगदीशतर्कालङ्कारगदाधरभट्टाचार्य्यौ दीधितिटीकाकारौ। एतदतिरिक्ता वादार्थकारा बहवः पण्डिता आसन्॥ तर्कशास्त्रम्। यथा, शब्दरत्नावल्याम्।
"न्यायवैशेषिकादिः स्यात् तर्कविद्या प्रतिष्ठिता।
तस्यामान्वीक्षिकी ज्ञेया तत्रात्मज्ञानसुन्नयेत्॥"
अथ न्यायप्रथमसूत्रं लिख्यते प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः। एषां लक्षणानि यथा। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि। १। आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्। २। समानानेकधर्म्मोपपत्तेर्व्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः। ३। यमर्थमधिकृत्य प्रवर्त्तते तत् प्रयोजनम्। ४। लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसामान्यं स दृष्टान्तः। ५। तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः। ६। प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः। ७। अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः। ८। विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः। ९। प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। १०। यथोपपन्नच्छलजातिनिग्रहस्थानोपालम्भो जल्पः ११। सत्प्रतिपक्षस्थापनाहीनो वितण्डा। १२। सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालात्ययापदिष्टा हेत्वाभासाः। १३। वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। १४। साधर्म्म्यवैधर्म्म्याभ्यां प्रत्यवस्थानं जातिः। १५। विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। १६। इति गोतमसूत्रम्॥ *॥ न्यायशास्त्रञ्च पञ्चाध्यायात्मकम्। तत्र प्रत्यध्यायस्याह्निकद्वयम्। तत्र प्रथमाध्यायस्य प्रथमाह्निके भगवता गोतमेन प्रमाणादिपदार्थनवकलक्षणनिरूपणं विधाय द्वितीये वादादिसप्तपदार्थलक्षणनिरूपणम्। १। द्वितीयस्य तु प्रथमे संशयपरीक्षणं प्रमाणचतुष्टयाप्रामाण्यशङ्कानिराकरणञ्च। द्वितीये अर्थापत्त्यादेरन्तर्भावनिरूपणम्। २। तृतीयस्य प्रथमे आत्मशरीरेन्द्रियार्थपरीक्षणम्। द्वितीये बुद्धिमनःपरीक्षणम्। ३। चतुर्थस्य प्रथमे प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गपरीक्षणम्। द्वितीये दोषनिमित्तकत्वनिरूपणं अवयवादिनिरूपणञ्च। ४। पञ्चमस्य प्रथमे जातिभेदनिरूपणम्। द्वितीये निग्रहस्थानभेदनिरूपणम्। ५। इति सर्व्वदर्शनसंग्रहः॥ *॥ युक्तिमूलकदृष्टान्तविशेषः। स च बहुविधः। तेषां मध्ये प्रसिद्धानां नामलक्षणप्रमाणानि लिख्यन्ते॥

| न्यायनामानि | तल्लक्षणानि | तत्प्रमाणानि |
| --- | --- | --- |
| अन्धगोलाङ्गूलन्यायः १। | कश्चिद्दुरात्मा महारण्यमार्गे पतितमन्धं स्वबन्धुनगरं जिगमिषुं बभाषे किमत्रायुष्मता दुःखितेन स्थीयत इति स चान्धः सुखवाणीमाकर्ण्य तमाप्तं मत्वोवाच अहो मद्भागधेयं यदत्रभवान् दीनं मां स्वाभीष्टनगरप्रापणसमर्थं भाषते ते स च विप्रलिप्सुर्दुष्टो गोयुवानमानीय तदीय | हेत्वाभासमथुरानाथटीकादयः १। |